शृङ्गाटकं समङ्गाञ्च पद्मकेशरमित्यपि ॥
कल्कीकृत्य पचेत् सर्पिः पयो दद्याच्चतुर्गुणम् ।
सम्यक् पक्वेऽवतीर्णे च शीते तस्मिन् विनिः-
क्षिपेत् ॥
सर्पिस्तुल्यं भिषक् क्षौद्रं ततस्तं निधापयेत् ।
विषाणि हन्ति दुर्गाणि गरदोषकृतानि च ॥
स्पर्शाद्धन्ति विषं सर्व्वं गरैरुपहतां त्वचाम् ।
योगजन्तमकं कण्डुं मांससादं विसंज्ञताम् ॥
नाशयत्यञ्जनाभ्यङ्गं पानवस्तिषु योजितम् ।
सर्पकीटाखुलूतादिदष्टानां विषहृत् परम् ॥”
मृत्युपाशच्छेदि घृतम् । इति भावप्रकाशः ॥
(तथा च ।
“कोटिभ्यो दारुणतरा लूताः षोड़श ता जगुः ।
अष्टाविंशतिरित्येके ततोऽप्यन्ये तु भूयसीः ॥
सहस्ररश्म्यनुचरा वदन्त्यन्ये सहस्रशः ।
बहूपद्रवरूपा तु लूतैकैव विषात्मिका ॥
रूपाणि नामतस्तस्या दुर्ज्ञेयान्यतिसङ्करात् ।
नास्ति स्थानव्यवस्था च दोषतोऽतः प्रचक्ष्यते ॥
कृच्छ्रसाध्या पृथग्दोषैरसाध्या निचयेन सा ।
तद्दंशः पैत्तिको दाहतृट्स्फोटज्वरदाहवान् ॥
भृशोष्मा रक्तपीताभः क्लेदी द्राक्षाफलोपमः ।
श्लैष्मिकः कठिनः पाण्डुः परूषकफलाकृतिः ॥
निद्रां शीतज्वरं कासं कण्डूञ्च कुरुते भृशम् ।
वातिकः परुषः श्यावः पर्व्वभेदज्वरप्रदः ॥
तद्विभागं यथास्वञ्च दोषलिङ्गैर्विभावयेत् ।
असाध्यायास्तु हृन्मोहश्वासहिक्काशिरो-
रुजाः ॥
श्वेताः पीताः सिता रक्ताः पिटिकाः श्वयथू-
द्भवाः ॥
वेपथुर्व्वमथुर्दाहस्तृड़ान्ध्यं वक्रनासता ।
श्यावोऽष्ठवक्त्रदन्तत्वं पृष्ठग्रीवावभञ्जनम् ॥
पक्वजम्बूसवर्णञ्च दंशात् स्रवति शोणितम् ।
सर्व्वापि सर्व्वजा प्रायो व्यपदेशस्तु भूयसा ॥
तीक्ष्णमध्यावरत्वेन सा त्रिधा हन्त्युपेक्षिता ।
सप्ताहेन दशाहेन पक्षेण च परं क्रमात् ॥
लूतादंशश्च सर्व्वोऽपि दद्रुमण्डलसन्निभः ।
सितोऽसितोऽरुणः पीतः श्यावो वा मृदुरु-
न्नतः ॥
मध्ये कृष्णोऽथवा श्यावः पर्य्यन्ते जाल-
कावृतः ।
विसर्पवान् शोफयुतस्तप्यते बहुवेदनः ॥
ज्वराशुपाकविक्लेदकोथावदरणान्वितः ।
क्लेदेन यत् स्पृशत्यङ्गं तत्रापि कुरुते व्रणम् ॥
श्वासदंष्ट्राशकृन्मूत्रशुक्रलालानखार्त्तवैः ।
अष्टाभिरुद्वमत्येषा विषं वक्रैर्व्विशेषतः ॥
लूता नाभेर्दशत्यूर्द्ध्वमूर्द्ध्वं वाधश्च कीटकाः ।
तद्दूषितञ्च वस्त्रादि देहे स्पृष्टं विकारकृत् ॥
दिनार्द्धं लक्ष्यते नैव दंशो लूताविषोद्भवः ।
सूचीव्यधवदाभाति ततोऽसौ प्रथमेऽहनि ॥
अव्यक्तवर्णः प्रचलः किञ्चित् कण्डूरुजान्वितः ।
द्वितीयेऽभ्युन्नतोऽन्तेषु पिटकैरिव चाचितः ॥
व्यक्तवर्णो नतो मध्ये कण्डूमान् ग्रन्थिसन्निभः ।
तृतीये सज्वरो रोमहर्षकृद्रक्तमण्डलः ॥
शरावरूपस्तोदाढ्यो रोमकूपेषु संस्रवः ।
महांश्चतुर्थे श्वयथुस्तापश्वासभ्रमप्रदः ॥
विकारान् कुरुते तांस्तान् पञ्चमे विषकोपजान् ।
षष्ठे व्याप्नोति मर्म्माणि सप्तमे हन्ति जीवितम् ॥
इति तीक्ष्णं विषं मध्यं हीनञ्च विभजेदतः ।
एकविंशतिरात्रेण विषं शाम्यति सर्व्वथा ॥
अथाशु लूतादष्टस्य शस्त्रेणादंशमुद्धरेत् ।
दहेच्च जाम्बवौष्ठाद्यैर्न तु पित्तोत्तरं दहेत् ॥
कर्कशं भिन्नरोमाणं मर्म्मसन्ध्यादिसंश्रितम् ।
प्रसृतं सर्व्वतो दंशं नच्छिन्दीत दहेन्न च ॥
लेपयेदगदैर्म्मधुसैन्धवसंयुतैः ।
सुशीतः सेचयेच्चानुकषायैः क्षीरिवृक्षजः ॥
सर्व्वतोऽपहरेद्रक्तं शृङ्गाद्यैः सिरयापि वा ।
सेका लेपास्ततः शीता बोधिश्लेष्मान्तकाक्षरैः ॥
फलिनीद्विनिशाक्षौद्रसर्पिर्भिः पद्मकाह्वयः ।
अशेषलूताकीटानामगदः सर्व्वकार्म्मिकः ॥”
“रोध्रं सेव्यं पद्मकं पद्मरेणुः
कालीयाख्यं चन्दनं यच्च रक्तम् ।
कान्ता पुष्पं दुग्धिनीका मृणालं
लूताः सर्व्वा घ्नन्ति सर्व्वक्रियाभिः ॥”
इति वाग्भटे उत्तरस्थाने ३७ अध्यायः ॥)

लूतारिः, पुं, (लूताया अरिः ।) दुग्धफेनीक्षुपः । इति राजनिर्घण्टः ॥

लूतिका, स्त्री, (लूतैव । स्वार्थे कन् । टापि अत इत्वम् ।) मर्कटकः । इति शब्दरत्नावली ॥

लूनः, त्रि, (लूयते स्मेति । लू + क्तः । “ल्वादिभ्यः ।” ८ । २ । ४४ । इति निष्ठातस्य नः ।) छिन्नः । इत्यमरः ॥ (यथा, कथासरित्सागरे ।२७।१४३।
“दैवेन वैरिणा संख्ये लूनबाहुवनः कृतः ॥”
उपचितः । यथा, कुमारे । ३ । ६१ ।
“तस्याः सखीभ्यां प्रणिपातपूर्व्वं
स्वहस्तलूनः शिशिरात्ययस्य ।
व्यकीर्य्यत त्र्यम्बकपादमूले
पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥”)

लूनकः, पुं, (लून एव । स्वार्थे कन् ।) भेदितः । पशुः । इति मेदिनी । के, १५६ ॥

लूनिः, स्त्री, (लू + क्तिन् । “ऋकारल्वादिभ्यः क्तिन्निष्ठावद्भवतीति वक्तव्यम् ।” ८ । २ । ४४ । इत्यस्य वार्त्तिकोक्त्या तस्य नः ।) छेदः । इति मुग्धबोधव्याकरणम् ॥ (व्रीहिः । इत्युज्ज्वलदत्तः । ४ । १०५ ॥)

लूमं, क्ली, (लूयते इति । लू + बाहुलकात् मक् ।) लाङ्गूलम् । इत्यमरः ॥

लूमविषः, पुं, (लूमे लाङ्गूले विषमस्य ।) वृश्चिकादिः । इति हेमचन्द्रः ॥

लूष, क वधे । स्तेये । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, लूषयति । इति दुर्गादासः ॥

लेखः, पुं, (लिख्यते इति । लिख् + घञ् ।) देवः । इत्यमरः ॥ लेख्यः । इति मेदिनी । खे, ४ ॥ (यथा, कुमारे । १ । ७ ।
“व्रजन्ति विद्याधरसुन्दरीणा-
मनङ्गलेखक्रिययोपयोगम् ॥”)

लेखकः, पुं, (लिखतीति । लिख् + ण्वुल् ।) लेखनकर्त्ता । तत्पर्य्यायः । लिपिकरः २ अक्षरचणः ३ अक्षरचुञ्चुः ४ । इत्यमरः । २।८ । १५ ॥ वोलकः ५ करकः ६ मसीपण्यः ७ करप्रणीः ८ । इति शब्दरत्नावली ॥ वर्णी ९ । इति जटाधरः ॥ * ॥ तस्य लक्षणानि यथा,—
“सर्व्वदेशाक्षराभिज्ञः सर्व्वशास्त्रविशारदः ।
लेखकः कथितो राज्ञः सर्व्वाधिकरणेषु वै ॥
शीर्षोपेतान् सुसंपूर्णान् समश्रेणिगतान्
समान् ।
अक्षरान् वै लिखेद्यस्तु लेखकः स वरः स्मृतः ॥
उपायवाक्यकुशलः सर्व्वशास्त्रविशारदः ।
बह्वर्थवक्ता चाल्पेन लेखकः स्याद्भृगूत्तम ॥
वाक्याभिप्रायतत्त्वज्ञो देशकालविभागवित् ।
अनाहार्य्यो नृपे भक्तो लेखकः स्याद्भृगूत्तम ॥”
इति मात्स्ये १८९ अध्यायः ॥ * ॥
अपि च ।
“सकृदुक्तगृहीतार्थो लघुहस्तो जिताक्षरः ।
सर्व्वशास्त्रसमालोकी प्रकृष्टो नाम लेखकः ॥”
इति चाणक्यसंग्रहः ॥ * ॥
राजलेखकलक्षणं यथा,—
“ब्राह्मणो मन्त्रणाभिज्ञो राजनीतिविशारदः ।
नानालिपिज्ञो मेधावी नानाभाषासमन्वितः ॥
मन्त्रणाचतुरो धीमान् नीतिशास्त्रार्थकोविदः ।
सन्धिविग्रहभेदज्ञो राजकार्य्ये विचक्षणः ॥
सदा राजहितान्वेषी राजसन्निधिसंस्थितः ।
कार्य्याकार्य्यविचारज्ञः सत्यवादी जितेन्द्रियः ॥
स्वरूपवादी शुद्धात्मा धर्म्मज्ञो राजधर्म्मवित् ।
एवमादिगुणैर्युक्तः स एव राजलेखकः ॥
नृपानुवर्त्ती सततं नृपविश्वासरक्षकः ।
नृपतेर्हितकान्वेषी स एव राजलेखकः ॥”
इति पत्रकौमुदी ॥ * ॥
लेख्यकर्म्म कायस्थेन कर्त्तव्यम् । यथा,—
“लेखकानपि कायस्थान् लेख्यकृत्ये विचक्ष-
णान् ॥”
कुर्य्यादितिशेषः । इति पराशरसंहितायाम् १० अध्यायः ॥ (गणेशस्तु महाभारतस्य लेखकः । यथा, महाभारते । १ । १ ७८—७९ ।
“श्रुत्वैतत् प्राह विघ्नेशो यदि मे लेखनी क्षणम् ।
लिखतो नावतिष्ठेत तदा स्यां लेखको ह्यहम् ॥
व्यासोऽप्युवाच तं देवमबुद्ध्वा मा लिख क्वचित् ।
ॐमित्युक्त्वा गणेशोऽपि बभूव किल लेखकः ॥”)

लेखनं, क्ली, (लिख + ल्युट् ।) छर्द्दनम् । भुर्ज्जत्वक् । अक्षरविन्यासः । इति मेदिनी । मे, १२२ ॥*॥ भूमौ लेखननिषेधो यथा,—
“न भूमौ विलिखेद्वर्णं मन्त्रं न पुस्तकं लिखेत् ॥”
इति योगिनीतन्त्रे तृतीयभागे ७ पटलः ॥
लेखनाञ्जनम् । यथा,—
“दक्षाण्डत्वक्शिलाकाचशङ्खचन्दनसैन्धवैः ।
चूर्णितैरञ्जनं प्रोक्तं पुष्पार्म्मादिनिकृन्तनम् ॥”